म्+इनि पृषो०। किमिदानीमित्येवं चरणशीले पिशुने-खले "इषे धत्तमनवायं किमीदिने" ऋ०७,१०४,२, "किमीदिने किमिदानीमितिचरते पिशुनाय" भा० "विलुपन्तु यातुधाना अत्त्रिणो ये किमीदिनः" अथ०१,७,३,

**किमु** अव्य० कै–डिमु। १प्रश्ने, २निषेधे, ३वितर्के, ४निन्दायाञ्च मेदि० "किमु भीरुररायसे" भट्टिः

**किमुत** अव्य० किञ्च उत च द्व०। १प्रश्ने, २वितर्के३विकल्पे, ४अतिशये च। कैमुतिकन्यायः तस्य शब्दद्वयात्मकत्वे तद्ध स्यादिति बोध्यम् "आहो उताहो किमुत वितर्के किं किमूत च" हेम० किमु–उत इति छेदः तेन किमूतेत्येकशब्दकल्पनं चिन्त्यम्

**किम्पच** त्रि० किं पचति पच–अच्। कृपणे रायमु०। सहि आत्मोदरपूर्त्तिसमर्थमात्रं पचति नागन्तुकातिथिभ्योदानपर्य्याप्तम्। इति तस्य तथात्वम्।

**किम्पचान** त्रि० किम्+पच–आनच्। आत्मोदरपूर्त्तिमात्रपर्य्याप्तपाककर्त्तरि कृपणे अमरः। [लतायां रत्नमा०

**किम्पाक** पु० कुत्सितः पाकोयस्य। (माखाल) महाकाल

**किम्पुना** स्त्री भा०प्रसिद्धे नदीभेदे "किम्पुना च विशल्या च तथा वैतरणी नदी" भा०स०९ वरुणसभावर्णने। "वितस्ताञ्च महाभाग! कावेरीञ्च महानदीम्। शोणञ्च पुरुषव्याघ्र! विशल्यां किम्पुनामपि" भा०व०१८८अ०

**किम्पु(म्पू)रुष** पु० कुत्सितः पु(पू)रुषः। देवयोनिभेदे देवगायके अमरः। स च अश्वाकारजघनः नराकारमुखः। किन्नरस्तु अश्वाकारवदनः नराकारजघन इति तयोर्भेदः। अतएव "राक्षसाश्च पुलस्त्यस्य वानराः किन्नरास्तथा" इति पुलस्त्यस्य वंशमुक्त्वा "पुलहस्य सुताः राजन्! शलभाश्च प्रकीर्त्तिताः। सिंहाः किम्पुरुषा व्याघ्रा यक्षा-ईहामृगास्तथा" भा० आ०६६अ० पुलहवंशे किम्पुरुषस्य कीर्त्तनम्। अतएव भाग० ८,२०,१२, "नेदुर्मुकुन्दुभयः सहस्रशोगन्धर्व्वकिम्पूरुषकिन्नराजगुः"। तयोर्भेदेन निर्द्देशः। "स यं पुरुषमालभत स किम्पुरुषोऽभवत्" शत०ब्रा० १,२,३,९, किंपुरुषावासे २वर्षभेदे। कुत्सितपुरुषत्वसाम्यात् परस्परमभेदाभिप्रायेण उभयोरप्युभयपरता तेन क्वचित् किन्नरवर्षमित्युच्यते क्वचिच्च किम्पुरुषवर्षम् इति। तदधिष्ठानदेशभेदस्य वर्षभेदः स च "किंन्नरवर्षमतो हरिवर्षमिति विभज्य" "माल्यवज्जलधिमध्यवर्त्ति यत् तत्तु भद्रतुरगं (सुखेन तुरगतुल्यम्) जगुर्बुधाः" सि०शि०उक्तः भाग०५,१९, "किम्पुरुषे वर्षे इत्युक्तम्। "देशं किम्पुरुषावासं द्रुमपुत्रेण रक्षितम्" भा०स०२७अ०। "द्रुमः किंपुरुषेशश्च उपास्ते धनदेश्वरम्" भा० स०१०अ०। "काश्मीरराजो गोनर्द्दः करूषाधिपतिस्तथा। द्रुमः किम्पुरुषस्यैव पर्व्वतीयोह्यनामयः" हरिवं०९२अ०।

"प्रियामुखं किम्पुरुषश्चुचुम्बे" "यदृच्छया" किम्पुरुषाङ्गनानाम्" कुमा०। [राजनि च।

**किम्पुरुषेश्वर** पु० ६त० १कुवेरे किम्पुरुषवर्षेश्वरे २द्रुमाभिधे-

**किम्भरा** स्त्री किञ्चित् बिभर्त्ति भृ–अच्। नलीनामगन्धद्रव्ये शब्दच०

**कियत्** त्रि० किम्+परिमाणे,वतुप् किमः क्यादेशः वस्य यः। किंपरिमाणे "गन्तव्यमस्ति कियदित्यसकृद्ब्रुवाणा,, सा०, द०, "मदर्थसन्देशमृणालमन्थरः प्रियःकियद्दूरमिति त्वयोदिते" "भवेदमीभिः कमलोदयः कियान्" नैष०, स्त्रियां ङीप् "निविशते यदि शूकशिखा पदे सृजति सा कियतीमिव न व्यथाम्" नैष०।

**कियदेतिका** स्त्री कियत् एतत् आरभ्यमाणं करोति णिचि डित्त्वे टिलोपे ण्वुल्। उद्योगे उत्साहे हेम०। त्रिका० कियेतद्केति पाठः प्रामादिकः।

**कियाम्बु** त्रि० कियदम्बु यत्र वेदे पृषो०तोलोपः। किंप्रमाणाम्बुयुक्ते "कियाम्ब्वत्र रोहतु पाकदूर्व्वा व्यल्कशा,, ऋ० १०,१६,१३,।

**कियाह** पु० रक्तवर्णे अश्वे हेमच०।

**कियेधास्** अव्य०कियत्प्रकारे इत्यर्थे निरु० २० "त्वाय वज्रमीशानः कियेधाः,,व०,१,६१,१२, "कियेधाः कियद्धा-इति" भा०।

**किर** पुंस्त्री कॄ–क। १शूकरे अमरः स्त्रियां जातित्वात् ङीष् २विक्षेपकमात्रे त्रि०। कीर्य्यतेऽत्र आधारे कॄ–घञर्थे क। ३अवस्करविक्षेपदेशे पर्य्यन्तभूमौ। किरातः

**किरक** पु० स्वल्पः किरः अल्पे कन्। १बालशूकरे२लेखके च त्रिका०

**किरण** पु० कीर्य्यते परितः कॄ–कर्म्मणि क्यु। सूर्य्यादेः रश्मौ "स्वकिरणपरिवेषोन्मेषशून्यः प्रदीपः" रघुः "एकोहि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः" कुमा०। ततः अरीहणा० चतुरर्थ्यां वुञ्। कैरणक तन्निर्वृत्तादौ त्रि० [हारा०।

**किरणमालिन्** पु० किरणानां मालाऽस्त्यस्य इनि। सूर्य्ये

**किराटिका** स्त्री० किरे पर्य्यन्त भूमौ अटति अट–ण्वुल्। पर्य्यन्त भूमिचारिण्यां शारिकायां पक्षिण्याम् शब्दचि०